द्विचतुःषड्दशभ्यश्च कलास्तु विरुदे मताः।
दशभ्यो नाधिकाः कार्य्याः कलास्तु विरुदे बुधैः॥
कलिकाभ्यस्तु विरुदे भिदाभावेव कीर्त्तिता।
विरुदं कवयः प्राहुर्गुणोत्कर्षादिवर्णनम्।
विरुदः कलिका चान्ते धीरवीरादिशब्दभाक्॥
इत्युपोद्घातः। इति श्रीरूपगोस्वामिकृतश्रीगोविन्दविरुदावलीभाष्ये श्रीबलदेवविद्याभूषणः॥

विरुदावली, स्त्री, (विरुदानामावली।) विरुदश्रेणी। स्तवमाला। तल्लक्षणादि यथा,—
"अधीत्य विरुदावल्या लक्षणं ग्रन्थकृत्तमम्।
एताश्चेत् पठति प्राज्ञस्तदा बोधोऽस्य पुष्कलः॥
सामान्यविरुदावल्या गोविन्दविरुदावली।
योऽभ्यधायि विशेषस्तैः स तावदिह लिख्यते॥
कलिका लोकविरुदैर्युता विविधलक्षणैः।
कीर्त्तिप्रतापशौटीर्य्यसौन्दर्य्याशेषशालिनी॥
कलिकाद्यन्तसंसर्गिपद्या दोषविवर्ज्जिता।
शब्दाडम्बरसंवहा कर्त्तव्या विरुदावली॥"
इति श्रीरूपगोस्वामिकृते श्रीगोविन्दविरुदावलीभाष्ये श्रीबलदेवविद्याभूषणः॥ * ॥ कलिकालक्षणं कलिकाशब्दे लिखितम्। विरुदलक्षणं तच्छब्दे द्रष्टव्यम्॥

विरुद्धः, त्रि, (वि + रुध + क्तः।) विरोधविशिष्टः। यथा। विरुद्धधर्म्मसमवाये भूयसां स्यात् सधर्म्मकत्वम्। इति जैमिनीसूत्रम्॥
"विरुद्धं गुरुवाक्यस्य यदत्र भाषितं मया।
तत् क्षन्तव्यं बुधैरेव स्खलितस्त्वगुरुस्तथा॥
स्खलितत्वे प्रमादाद्यद्विरुद्धं बहुभाषितम्।
गुणलेशानुरागेण तच्छोध्यं धर्म्मदर्शिभिः॥"
इति तिथ्यादितत्त्वम्॥
(शम्भमनोर्म्मन्वन्तरवर्त्ती देवतान्यतमः। यथा, भागवते। ८। १३। २९।
"हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः।
सुवासना विरुद्धाद्या देवाः शम्भुः सुरेश्वरः॥"
क्ली, विचाराङ्गीयदोषविशेषः। यथा। "विरुद्धं नाम यद्दृष्टान्तसिद्धान्तसमयैर्विरुद्धं तत्र दृष्टान्तसिद्धान्तावुक्तौ। समयः पुनर्यथायुर्व्वेदिकसमयो याज्ञियसमयो मोक्षशास्त्रिकसमय इति। तत्रायुर्व्वेदिकसमयः चतुष्पादभेषजमिति। आलभ्या यजमान इति याज्ञियसमयः। सर्व्वभूतेष्वहिंसेति मोक्षशास्त्रिकसमयस्तत्र स्वसमयविपरीतमुच्यमानं विरुद्धमिति।" इति चरके विमानस्थानेऽष्टमेऽध्याये।)

विरूढ़ः, त्रि, अङ्कुरितः। (यथा, "विरूढ़जातं अङ्कुरितधान्यकृतमन्नम्।" इति माधवकृतरुग्विनिश्चये मूलव्याख्याने विजयरक्षितः॥) जातः। इति मेदिनी। ढ, ६॥ (यथा, रघुवंशे। २। २६।
"गङ्गाप्रपातान्तविरूढ़शष्पं
गौरीगुरोर्गह्वरमाविवेश॥")
आरोहणविशिष्टः। यथा।
"सन्तुष्टे तिसृणां पुरामपि रिपौ कण्डूलदोर्मण्डली-
लीलालूनपुनर्विरूढ़शिरसो वीरस्य लिप्सोर्व्वरम्।"
इत्यादि मुरारिः॥

विरूपं, क्ली, पिप्पलीमूलम्। इति राजनिर्घण्टः॥

विरूपः, त्रि, (विकृतं रूपं यस्य।) कुत्सितः। कुरूपः। यथा,—
"विरूपोन्मत्तनिःस्वानामकृत्वापूर्व्वकं हि यत्।
पूरणं दानमानाभ्यामनुग्रह उदाहृतः॥"
इति रामतर्कवागीशः॥
(यथा, बृहत्संहितायाम्। ७०। २३।
"या तूत्तरोष्ठेन समुन्नतेन
रूक्षाग्रकेशी कलहप्रिया सा।
प्रायो विरूपासु भवन्ति दोषा
यत्राकृतिस्तत्र गुणा वसन्ति॥"
परित्यक्तरूपः। यथा, ऋग्वेदे। १०।९५।१६।
"यद्विरूपाचरं मर्त्त्येष्ववसं रात्रीः शरदश्चतस्रः।"
"यद्यदा विरूपा परं मनुष्यस्य सम्पर्कात् विगतस्वकभूतदेवरूपाः।" इति तद्भाष्ये सायणः॥ नानारूपः। यथा, ऋग्वेदे। ३। ५३। ७।
"इमे भोजा अङ्गिरसो विरूपा
दिवस्पुत्रासो असुरस्य वीराः॥"
"हे इन्द्र इमे यागं कुर्व्वाणा भोजाः सौदासाः क्षत्रियाः तेषां याजका विरूपाः विविधरूपा मेधातिथिप्रभृतयः॥" इति तद्भाष्ये सायणः॥ विरुद्धः। यथा, साहित्यदर्पणे। १० परिच्छेदे।
"विरूपयोः संघटना या च तद्विषमं मतम्॥"
उदाहरणं यथा,—
"क्व वनं तरुवल्कभूषणं
नृपलक्ष्मीः क्व महेन्द्रवन्दिता॥")
स्वार्थे के विरूपकञ्च॥

विरूपः, पुं, सुमनोराजपुत्रः। यथा,—
"जाताः सुमनसः पुत्त्रास्त्रयः शूरा महाबलाः।
सुमतिश्च विरूपश्च सत्यः शास्त्रार्थपारगाः॥"
इति कालिकापुराणे ६० अध्यायः॥

विरूपा, स्त्री, दुरालभा। अतिविषा। इति राजनिर्घण्टः॥

विरूपाक्षः, पुं, (विरूपे अक्षिणी यस्य। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्।" इति षच्।) शिवः। इत्यमरः॥ (यथा, साहित्यदर्पणे। १०।
"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः॥")
रुद्रभेदः। इति जटाधरः॥ तस्य पुरी सुमेरोर्नैर्ऋतकोणे वर्त्तते। यथा,—
"तथा चतुर्थे दिग्भागे नैर्ऋताधिपतेः शुभा।
नाम्ना कृष्णावती नाम विरूपाक्षस्य धीमतः॥"
इति वाराहे रुद्रगीता॥
(विरूपे, त्रि। यथा, कुमारे। ५। ७२।
"वपुर्व्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु॥")

विरूपिका, स्त्री, (विकृतं रूपं यस्याः। कन्। टापि अत इत्वम्।) कुरूपा। यथा,—
"नाप्नुयः परिविन्दन्ति न यज्ञा न तपांसि च।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका॥"
इत्युद्वाहतत्त्वम्॥

विरूपी, [न्] पुं, (विरुद्धं रूपमस्यास्तीति। इनिः।) जाहकजन्तुः। इति राजनिर्घण्टः॥ कुरूपविशिष्टे, त्रि॥

विरेकः, पुं, (वि + रिच + घञ्।) मलभेदः। तत्पर्य्यायः। रेचनम् २ रेकः ३ रेचना ४ विरेचनम् ५। इति शब्दरत्नावली॥ प्रस्कन्दनम् ६। इति रत्नमाला॥ (यथा, वैद्यके।
"धूमात्युष्णशिरो विरेकवमनस्वेदोपनाहादिकं
पानाहारविहारभेषजमिदं श्लेष्मामयघ्नं जयेत्॥"
अस्य योग्यायोग्या यथा,—
"बालवृद्धकृशक्षीणपीनसार्त्तभयार्द्दिताः।
रूक्षशोषक्षयायुक्ता गर्भिणी च नवज्वरी॥
अधो गच्छति यस्यासृक् सूतिकातङ्करोगिणी।
नैते विरेकयोग्याः स्युरन्येषाञ्च बलाबलम्॥
नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या वीक्ष्य देहबलादिकम्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे विरेकाधिकारे।)

विरेचकः, त्रि, रेचकः। विरेककारकः। सारकः। मलभेदकः। जोलाव इति भारतीभाषा॥ विपूर्व्वकरिच्धातोर्णुप्रत्ययेन निष्पन्नः। (यथा, वैद्यके।
"पटोलपत्रं पित्तघ्नं नाड़ी तस्य कफापहा।
फलं तस्य त्रिदोषघ्नं मूलं तस्य विरेचकम्॥")

विरेचनं, क्ली, (वि + रिच + ल्युट्।) विरेकः। इति शब्दरत्नावली॥ तत्कारकौषधं यथा,—
"हरीतकी समगुड़ा मधुना सह पेषिता।
विरेचनकरी रुद्र भवतीति न संशयः॥
त्रिफला चित्रकं चित्रं तथा कटुकरोहिणी।
ऊरुस्तम्भहरो ह्येष उत्तमश्च विरेचनम्॥"
अपि च।
"त्रिफला बदरं द्राक्षा पिप्पली च विरेचकृत्।
हरीतकी सोष्णनीरा लवणञ्च विरेचकृत्॥"
इति गारुड़े १८७। १९९ अध्यायौ॥ * ॥
अन्यच्च। अथ विरेचनविधिः।
"स्निग्धस्विन्नाय वान्ताय दद्यात् सम्यग्विरेचनम्।
अवान्तस्य त्वधःस्रस्तो ग्रहणीं छादयेत् कफः॥
मन्दाग्निगौरवं कुर्य्याज्जनयेद्वा प्रवाहिकाम्।
अथवा पाचनैरामं बलासं परिपाचयेत्।
अन्यदात्ययिके कार्य्ये शोधनं शीलयेद्बुधः॥"
आत्ययिके प्राणसङ्कटे।
"पित्ते विरेचनं युञ्ज्यादामोद्भूते गदे तथा।
उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः॥
दोषाः कदाचित् कुप्यन्ति जिता लङ्घनपाचनैः।
शोधनैः शोधिता ये तु न तेषां पुनरुद्भवः॥
बालो वृद्धो भृशं स्निग्धः क्षतक्षीणो भयान्वितः।
श्रान्तस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी॥